# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर–२०१८

| | | |
|---|---|---|
| *कक्षा– आचार्य* (SEM- 1) | **प्रश्नपत्रम्-३** | *गुणाः -७०* |
| *विषयः– रामानुजवेदान्तः* | *कोड–* CC 4.1.2<br>(NEW SYLLABUS) | *समयः – ०२ तः ०५* |
| *दिनाङ्कः–१७–१२–२०१८* | *सन्दर्भग्रन्थः – श्रीमद्भगवद्गीता–रामानुजभाष्यम्* | |

## प्रथमान्वितिः

**प्रश्नः १ अन्यतमः ससन्दर्भं व्याख्येयः।** ०५

*(१) अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।*
*आचार्योपासनं शौर्यं स्थैर्यमात्मविनिग्रहः ॥*

*(२) ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वमृतमश्नुते ॥*
*अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥*

**प्रश्नः २ एक एव साध्यः ।** १०

*(१) आत्मज्ञानसाधनतया उपादेयान् गुणान् यथाभाष्यं विवृणुत ।*

*(२) क्षेत्रक्षेत्रज्ञयोः भाष्यानुगुणं स्वरूपं स्पष्टयत।*

## द्वितीयान्वितिः

**प्रश्नः ३ द्वयोः अन्यतरस्य व्याख्यानं कुरुत ।** ०५

*(१) उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः।*
*परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥*

*(२) समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।*
*न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ।*

**प्रश्नः ४ एकस्यैव व्याख्यानं विवृणुत।** १०

*(१) प्रकृत्यात्मनोः द्वयोः कार्यभेदः संसर्गहेतुः इति यथाग्रन्थम् उपपादयत ।*

*(२) सप्तदशाध्यायस्य सारं सङ्गृह्णीत ।*

## तृतीयान्वितिः

**प्रश्नः ५ द्वयोः अन्यतरः भाष्यानुगुणः साध्यः।** ०५

*(१) सत्त्वरजस्तम इति गुणाः प्रकृतिसम्भवाः ।*
*निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥*

*(२) यदा सत्त्वे प्रवृद्धे तु प्रलयं चाति देहभृत् ।*
*तदोत्तमविदां लोकान् अमलान्प्रतिपद्यते ॥*

**प्रश्नः ६ एक एव साध्यः।** **१०**

(१) *गुणत्रयस्य स्वरूपं तत्कार्यञ्च निरूपयत ।*

(२) *चतुर्दशाध्यायस्य सारः लेख्यः ।*

## चतुर्थान्वितिः

**प्रश्नः ७ द्वयोः एकस्य सभाष्यं व्याख्यानं कुरुत ।** **०५**

(१) *निर्मानमोहा जितसङ्गदोषा- अध्यात्मनित्या विनिवृत्तकामाः ।*
*द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥*

(२) *शरीरं यदवाप्नोति यच्चाप्युत्क्रामतो ज्वरात् ।*
*गृहीत्वैतानि संयातिर्वायुगन्धानिवाशयत् ॥*

**प्रश्नः ८ एकस्यैव व्याख्यानं कुरुत ।** **१०**

(१) *पुरुषोत्तमस्य स्वरूपं सभाष्यं विशदयत।*

(२) *पुरुषोत्तमयोगस्य सारं सङ्गृह्णीत ।*

**प्रश्नः ९ दशानामेकवाक्येन उत्तरं लिखत ।** **१०**

१ *अश्वत्थवृक्षेण कः सूचितः?*

२ *पुरुषोत्तमयोगे कति श्लोकाः?*

३ *'अनघ' इति कस्य सम्बोधनम् ?*

४ *के अव्ययं पदं गच्छन्ति ?*

५ *जीवः कस्य अंश :?*

६ *अश्वत्थस्य शाखाः किं रूपाः ?*

७ *कदा अमृतमश्नुते ?*

८ *सत्त्वस्थाः कुत्र गच्छन्ति ?*

९ *मध्ये के तिष्ठन्ति ?*

१० *लोभः कस्मात् सञ्जायते ?*

११ *सुकृतस्य कर्मणः फलं कीदृशं ?*

१२ *तमः कस्माद् जायते ?*

१३ *कः कृत्स्नं प्रकाशयति ?*

१४ *प्रकृतिसम्भवाः गुणाः के ?*

१५ *कार्यकारणकर्तृत्वे कः हेतु : ?*

--००--